**अनारम्भ**: पु० न आरम्भः अभावार्थे न०त० । आरम्भाभावे अनुष्ठानाभावे । "न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते इति" गीता ।

**अनारोग्य** न० न आरोग्यम् । आरोग्याभावे । नास्ति आरोग्यं यस्मात् ५ब० । आरोग्यासाधने "अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनमिति" मनुः ।

**अनार्ज्जव** पु० ऋजोर्भाव आर्ज्जवं सरलता स्वाच्छन्द्यं वा न० ७ब० । रोगे । अभावार्थे अव्ययी० । ऋजुत्वाभावे अव्य० । ६ब० । कुटिले त्रि० ।

**अनार्त्तव** त्रि० ऋतुरस्य प्राप्तः ऋतु+अण् न०त० । स्वकालरूपे—ऋतौ—अनुत्पन्ने कुसुमादौ । ऋतोः स्त्रीकुसुमस्येदम् विकाशनम् आर्त्तवं तन्नास्ति यस्याः । अदृष्टरजस्कायां स्त्रियां स्त्री ।

**अनार्य्य** पु० न आर्य्यः न०त० । आर्य्यभिन्ने असच्चरिते । "अनार्य्य इति मामार्य्या इति" रामा० । न० ७ब० । आर्य्यानाश्रये देशे ।

**अनार्य्यक** न० । न आर्य्या यत्र देशे तत्र आर्य्यावर्त्तादिभिन्ने द्वीपान्तरादौ भवः अनार्य्य+कन् । अगरुकाष्ठे ।

**अनार्य्यज** न० । अनार्य्ये देशे जायते जन—ड । अनार्य्यदेशजाते अगरुकाष्ठे । तद्देशजातमात्रे त्रि० ।

**अनार्य्यतिक्त** पु० अनार्य्यप्रियस्तिक्तः शाक० त० । (चिराता) इति ख्याते भूनिम्बे वृक्षे ।

**अनार्ष** त्रि० ऋषिजुष्टत्वादृषिर्वेदस्तत्प्रोक्तः आर्षः न०त० । अवैदिके वेदाप्रयुक्ते । "संबुद्धौ शाकल्यस्येतावनार्षे" इति पा० । "अनार्षे अवैदिके" इति सि०कौ० । ऋषिणा दृष्टम् अण् आर्षम् न०त० । ऋषिणाऽदृष्टे । "अणिञोरनार्षयोर्गुरूपोत्तमयोरिति" पा० । "अनार्षयो किं? वाशिष्ठीति" सि०कौ० ।

**अनालोचि(डि)त** त्रि० न आलोचि (डि) तः । अविवेचिते । "अनालोचितकार्य्यस्य वाग्जालं वाग्मिनो वृथेति" माघः अनिर्लोचितेति वा पाठः ।

**अनाविल** त्रि० न आविलः । प्रसन्ने स्वच्छे कालुष्यरहिते ।

**अनाविद्ध** त्रि० न आविद्धः । अबाधिते । "अनाविद्धया तन्वा त्वाजय" ऋ० ६,७५,१ ।

**अनावृत्त** त्रि० न आवृत्तः अभ्यस्तः । अपुनर्गते प्रथमगते च । "मलमासेऽप्यनावृत्तां तीर्थयात्रां विवर्जयेदिति" स्मृतिः ।

**अनावृत्ति** स्त्री न आवृत्तिः पुनर्गमनम् । अभ्यासाभावे, आगमनाभावे च "अनावृत्तिः शब्दादिति" शा० सू० । "तत्र प्राप्तविवेकस्यानावृत्तीति" सां०सू० । ब० । तद्वति त्रि० ।

**अनावृष्टि** स्त्री आ+वृष—क्तिन् "अभावार्थे न० त० । "अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृता" इत्युक्ते ईतिभेदे "द्वादशवार्षिक्यामनावृष्ट्यामिति" हितो० ।

**अनाशक** पु० आ सम्यक् यथेच्छम् आशः अशनम् आ+अश घञ् न०ब०कप् नश्यति नश—ण्वुल् न०त०वा । यथेच्छभोगशून्ये, अनश्वरे च "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसाऽनाशकेनेति" श्रुतिः । फलकामनाशून्यत्वेन, भोगाय फलाजनकत्वात् तादृशकर्मणश्च भोगेन क्षयाभावाच्च तथात्वम् ।

**अनाशकायन** न नश्यति अनाशक आत्मा तस्यायनं प्राप्त्युपायः । आत्मज्ञानसाधने ब्रह्मचर्य्यभेदे, "अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्य्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दते" इति छा०उ० ।

**अनाशस्त** त्रि० आ+शन्सु स्तुतौ—क्त न०त० । अस्तुते । "अनाशस्त इवास्मसि" ऋ० १,२९,१, ।

**अनाशिन्** त्रि० न नश्यति नश—णिनि, कर्म्मफलमश्नुते अश—णिनि वा न०त० । अनश्वरे आत्मनि, ईश्वरे च, "अनाशिनोऽप्रमेयस्येति" गीता "अन्योऽनश्नन्नभिचाकशीति" श्रुतेरीश्वरस्य फलभोक्तृत्वाभावात्तथात्वम् । नाशरहिते त्रि० "नश्यतो विनिपातेनाविनिपाते त्वनाशिनौ" मनुः ।

**अनाशु** त्रि० नश—उण्—अश—व्याप्तौ कर्मणि उण् वा न०त० । विनाशरहिते, अव्याप्ते च । "धन्वन् विद्यो अनाशव" इति ऋ० १,१२५,९, "अनाशवः विनाशरहिताः अव्याप्ता वा इति भा० । न आशुः शीघ्रः न०त० । क्षिप्रभिन्ने । "अविप्रे चिद्वयोदधदनाशुनेति ऋ० ६,४५,२, "अनाशुना अक्षिप्रगमनेनेति" भा० ।

**अनाश्रमिन्** पु० न आश्रमी न०त० । गृहस्थाद्याश्रमशून्ये "अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विज" इति स्मृतिः ।

**अनाश्रय** त्रि० नास्ति आश्रयो यस्य । आलम्बनरहिते ।

**अनाश्वस्** त्रि० अश—भोजने क्वसु नि० । भोगशून्ये "उपेयिवाननाश्वाननूचानश्चेति" पा० "धृतजयधृतेरनाशुष" इति भारविः ।

**अनाश्वास** पु० अभावार्थे न०त० । आस्थाभावे विश्वासाभावे "प्रत्यक्षपूर्ब्बकत्वादनुमानस्य सर्व्वत्रानाश्वासप्रसङ्गादिति" वृ०उ० भा० ।